# Shri Dattatreya Stotram 10

# શ્રીદત્તાત્રેયસ્તોત્રમ્ ૧૦

## Document Information


Text title : Shri Dattatreya Stotram 10

File name : dattAtreyastotram10.itx

Category : dattatreya, deities_misc, vAsudevAnanda-sarasvatI

Location : doc_deities_misc

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

Shri Dattatreya Stotram 10

# શ્રીદત્તાત્રેયસ્તોત્રમ્ ૧૦

જન્માદ્યસ્ય યતો યતો જગદિદં શાસ્ત્રં ચ શાસ્ત્રપ્રમં
યત્તચ્છાસ્ત્રસમન્વિતં મતિહિતં વેદ્યં વિનષ્ટભ્રમમ્ ॥

દત્તાખ્યં તદુ માયયાઽસ્ય તુ મયા શાર્દૂલવિક્રીડિતમ્
પ્રારબ્ધં રુરુણેવ મન્દમતિના સ્તોત્રં તદસ્ત્વીડિતમ્ ॥ ૧॥

ઈક્ષાપૂર્વમચિન્ત્યશક્તિરસૃજદ્વિશ્વં ય એકો વિભુઃ ॥

સાધ્વ્યાઃ શાપમૃષેશ્ચ લોકવિપદો દ્રાગ્વારયન્ત્યાઃ પ્રભુઃ ॥

પત્ન્યા અત્રિમુનેસ્તપસ્વિન ઇતસ્ત્રેધાર્ભતાં નિર્મલમ્ ।
દુર્વાસઃશશિદત્તસંજ્ઞિત ઇનઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૨॥

કષ્ટાદીપકશિષ્યવન્નિજગુરું શ્રીવેદધર્માહ્વયમ્ ॥

રુષ્ટં રુગ્ણમહો નિષેવ્ય વરદં વિશ્વેશહર્યાહ્વયમ્ ॥

સોઽનાદૃત્ય સુરદ્વયં સ્વગુરુતો વવ્રે યશોસ્યામલમ્ ।
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૩॥

પ્રહ્લાદઃ ક્ષુધિતાતિથિદ્વિજનુષઃ શપ્તોઽસુરત્વં ગતઃ ॥

કૃત્વાઽજેન રણં ક્ષણં હતમતિઃ સોઽનાત્મવિત્વાદ્ગતઃ ॥

યં ભક્ત્યા શરણં યતોઽલભદિમામાન્વીક્ષિકીં નિશ્ચલમ્ ।
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૪॥

યં સાધ્યાભિધદેવતા ઉપગતાસ્તાભ્યો જગાદામૃતં
યો દુઃસઙ્ગનિવૃત્તિપૂર્વકમરં ધૈર્યં તિતિક્ષામૃતમ્ ॥

શાન્તિં ચાપિ તપોઽન્તરઙ્ગકતયા માયાનિયન્તાઽચલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૫॥

યં વર્ણાશ્રમલિઙ્ગહીનમમલં નગ્નં સ્થિતં સાવલં

નાગઃ પિઙ્ગલ ઊચ આશ્રમમિદં કિં તે વદેત્યાહ તમ્ ॥

યોઽસૌ પઞ્ચમમાશ્રમં સમદૃશઃ પૂતસ્ય મે હીત્યલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૬॥

યો બુદ્ધ્યાશ્રિતભૂનગાદિગુરુત આદેયહેયાત્મકં
શાન્ત્યાદિપ્રદશિક્ષણં ચ યદવે પૃષ્ટો જગૌ સ્વાર્જિતમ્ ॥

આત્મૈવાત્મગુરુઃ કિલેતિ ચ યતો યોઽદર્શયદ્વ્યર્ગલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૭॥

નિષ્ઠાં વીક્ષ્ય પુરા પુરારિરુભયીં યોગર્દ્ધિમુચ્ચૈર્દદૌ
બાહૂનાં ચ સહસ્રમાજિમરણં યશ્ચાર્જુનાયોદ્ધતિમ્ ॥

વન્દે ભાર્ગવરામકામદમરં શ્રીરેણુકાભીષ્ટદં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૮॥

રક્ષઃ પ્રત્યુપકાર્યદર્શયદહો ત્રિર્વિષ્ણુદત્તાય યં
દુર્દર્શોઽપિ નિમન્ત્રિતોઽગ્નિરવિયુક્ શ્રાદ્ધાન્નભુક્ સાન્વયમ્ ॥

તં રક્ષોઽપ્યનયન્નિજં પદમદો મોદાત્મકં સોજ્જ્વલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૯॥

ભિક્ષિત્વાન્નમુપાદિશદ્વરમમૂનન્વાગતબ્રહ્મણે
યૈઃ સપ્તગ્રહમુક્ત આસ મનુભિર્બ્રહ્માત્મજો બ્રહ્મણે ॥

તસ્મૈ દુર્ગ્રહનિગ્રહાય મહસે કુર્મો નમો મઙ્ગલમ્
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૧૦॥

આયુરાજવરપ્રદોઽપિ નહુષો હુણ્ડેન માયાવિના
તત્પોતં હૃતમાશુ હન્તુમજિતો યોઽરક્ષદાર્તિં વિના ॥

પિત્રોર્યોગમકારયચ્ચ જયિના તેનેષ્ટદોઽસાવલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૧૧॥

ભ્રાત્રાઽજૌ વિજિતો વિચિત્રચરિતસ્વામ્બાર્પિતશ્લોકત-
શ્ચાલર્કઃ શરણં યમાપ કૃપયા સાષ્ટાઙ્ગયોગં સવિત્ ॥

તસ્મૈ યેન મદાલસાભુવ ઉપાદિષ્ટો વરિષ્ઠોઽમલં
દત્તાત્રેયગુરુર્ભજત્સુરતરુઃ કુર્યાત્સ નો મઙ્ગલમ્ ॥ ૧૨॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીદત્તાત્રેયસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Dattatreya Stotram 10*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*